यज्ञियदेशः, पुं, (यज्ञियश्चासौ देशश्चेति ।) यागकरणोपयुक्तदेशः । यथा, मनुः ।२।२३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥"

यज्ञियशाला, स्त्री, (यज्ञिया शाला ।) यागमण्डपम् । इति जटाधरः ॥

यज्ञीयः, पुं, (यज्ञे भवः इति । यज्ञ + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । ३ । १२४ । ६ ।
"प्रशस्तेऽहनि यज्ञीये सर्व्वकामसमृद्धिमत् ।
कारयामास शर्य्यातिर्यज्ञायतनमुत्तमम् ॥")

यज्ञीयब्रह्मपादपः, पुं, (यज्ञीयश्चासौ ब्रह्मपादपश्चेति ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

यज्ञेश्वरः, पुं, (यज्ञानामीश्वरः ।) विष्णुः । यथा,
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्व्वे ॥"
इति श्राद्धतत्त्वम् ॥

यज्ञेष्टं, क्ली, (यज्ञे इष्टम् ।) दीर्घरोहिषकतृणम् । इति राजनिर्घण्टः ॥

यज्ञोडुम्बरः, पुं, (यज्ञोचितः उडुम्बरः ।) उडुम्बरवृक्षः । यज्ञडुमुर इति भाषा ॥ तत्पर्य्यायः । हेमदुग्धी २ यज्ञफलः ३ यज्ञाङ्गः ४ हेमदुग्धकः ५ उडुम्बरः ६ जन्तुफलः ७ । इति शब्दरत्नावली ॥ अस्य गुणाः यथा, भावप्रकाशे ।
"उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रनुत् ।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥"

यज्ञोपवीतं, क्ली, (यज्ञार्थं उपवीतम् ।) यज्ञसूत्रम् । पैता इति भाषा । तत्पर्य्यायः । पवित्रम् २ ब्रह्मसूत्रम् ३ द्विजायनी ४ । इति त्रिकाण्डशेषः ॥ तस्य निरूपणं यथा । उपवीतमाह गोभिलः । यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव । यज्ञोपवीतं विशिष्टविन्यासधारणकर्म्मतया कुरुते । किं तत् सूत्रम् । सूत्रं विशेषयति छन्दोगपरिशिष्टम् ।
"ऊर्द्ध्वन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥"
वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यं एवं त्रिवृतं त्रिसरं उपवीतं स्यात् । एको ग्रन्थिरिति नानात्वनिषेधार्थम् । तथा बौधायनः ।
"क्षौमं सौत्रं त्रिस्त्रिवृतं यज्ञोपवीतमानाभेः ॥"
क्षौमं कृमिकोषोद्भवं पट्टसूत्रादिमयमित्यर्थः । सौत्रं कार्पासोद्भवम् । तथा मनुः ।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्ध्ववृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥"
त्रिस्त्रिवृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृत्त्वाच्च त्रिसरत्वेन विशेष्यम् । यत्तु पैठीनसिवचनम् । कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य । क्षौमं राजन्यस्य । आविकं वैश्यस्य । तन्नव-
तन्त्वसम्भवे षट्तन्तुविधायकम् । नवतन्तुत्वं व्यक्तमाह देवलः ।
"यज्ञोपवीतं कुर्व्वीत सूत्राणि नव तन्तवः ।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा ॥"
एकेन ग्रन्थिना युक्त इति शेषः । द्विगुणस्त्रिगुणोऽथवेति । तन्तुबलेन द्विसरस्त्रिसरो वा कर्त्तव्यः । द्विसरत्वं त्रिसरत्वासम्भवे । गोभिले वाशब्दो विकल्पार्थः । अपिशब्दो वस्त्रकुशरज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः । एवकारस्त्रिसरत्वव्यवच्छेदार्थः । द्वितीयो वाशब्दः अनुक्तमौञ्जवालादिसमुच्चयार्थः । तथा निगमपरिशिष्टम् । वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण । कुशमुञ्जवालप्रतिसररज्जुभिर्व्वा । वालोऽत्र गोवालः । यथा देवलः ।
"कार्पासक्षौमगोवालशणरज्जुतृणोद्भवम् ।
सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः ॥"
तदभाव इति करणद्रव्याभावे कुशरज्जुभिरिति बोद्धव्यम् । इति श्राद्धविवेकः ॥ * ॥ अथोपनयनदिनम् । तत्र गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं शस्तम् । क्षत्त्रियस्य गर्भैकादशे । गर्भद्वादशे वैश्यस्य शस्तम् । अत्रासामर्थ्ये ब्राह्मणस्य षोड़शवर्षपर्य्यन्तमेव । क्षत्त्रियस्य द्वाविंशतिवर्षपर्य्यन्तम् । वैश्यस्य चतुर्व्विंशतिवर्षपर्य्यन्तं तदनुष्ठानकालः । तत्र मासाः माघफाल्गुनचैत्रवैशाखज्यैष्ठाषाढ़ा विहिताः । तत्र तिथयः द्वितीयैकादशीद्वादशीपञ्चमीदशमीतृतीया विहिताः । तत्र वाराः वृहस्पतिशुक्ररवीणां प्रशस्ताः । सामगानां मङ्गलवारोऽपि । तत्र नक्षत्राणि । स्वाती ज्येष्ठा धनिष्ठा अश्विनी अनुराधा हस्ता रेवती पुष्या चित्रा श्रवणा मृगशिरः शतभिषा पूर्व्वफल्गुनी उत्तरफल्गुनी पूर्व्वभाद्रपदा उत्तरभाद्रपदा रोहिणी पूर्व्वाषाढ़ा । तत्र लग्नानि वृषसिंहतुलाधनुर्मीनसंज्ञकानि । तत्र पक्षः शुक्लः । तच्चन्द्रादिशोभने अनध्यायादीन् परित्यज्य कर्त्तव्यम् । इति ज्योतिस्तत्त्वमतम् ॥ * ॥ अथोपनयनम् । तत्र गोभिलः । गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशेषु क्षत्त्रियं गर्भद्वादशेषु वैश्यम् । आषोड़शात् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्त्रियस्य आचतुर्व्विंशात् वैश्यस्य । अत ऊर्द्ध्वं पतितसावित्रीका भवन्ति । नैतानुपनयेयुर्नाध्यापयेयुर्न एभिर्व्विवाहयेयुः ॥ आषोड़शादित्यभिविधावाङ् । तथा च विष्णुधर्म्मोत्तरम् ।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः ।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते ॥"
अत्र षोड़शवर्षाणामुपनयनाङ्गता प्रतीयते ।
"पतिता यस्य सावित्री दश वर्षाणि पञ्च च ।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः ॥"
इति यमवचनेन तदनङ्गता प्रतीयते अनयोर्गर्भ-
जन्मगणनाभ्यामविरुद्धता । तथा च माधवः ।
"व्रतबन्धविवाहे च वत्सरपरिगणनमाहुराचार्य्याः ।
आधानपूर्व्वकमेके प्रसूतिपूर्व्वं सदान्ये तु ॥"
यत्तु द्विजानामित्युपक्रम्य पैठीनसिवचनम् । द्वादशषोड़शविंशतिश्चेदतीता अवरुद्धकाला भवन्ति । तद्वादशवर्षादुपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थं षोड़शवर्षोपरि गुरुप्रायश्चित्तमिति । तथा च शङ्खलिखितौ । व्रात्यश्चान्द्रायणं चरेत् गोप्रदानञ्च कुर्य्यात् । चान्द्रायणाशक्तौ धेन्वष्टकं तन्मूल्यं वा सार्द्धद्वाविंशतिकार्षापणाः गोमूल्यं कार्षापण एकः मिलित्वा सार्द्धत्रयोविंशतिकार्षापणाः देयाः । पितृमातृरहितस्य निःस्वस्य देशोपप्लवादिना पतितसावित्रीकस्य वा विषये तु मनुविष्णू ।
"येषां द्विजानां सावित्री नानुतिष्ठेद् यथाविधि ।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपना-
ययेत् ॥"
कृच्छ्रं प्राजापत्यम् । तदशक्तौ धेनुत्रयं तन्मूल्यं वा नव कार्षापणाः । अकृतप्रायश्चित्तं प्रत्याह नैतानित्यादि । तत्र बहुवचनं तत्कर्तृसंसर्गिणां प्रायश्चित्तप्रदर्शनार्थम् । तथा च स्मृत्यन्तरम् ।
"व्रात्याचार्य्यस्य भुक्तान्नं कृच्छ्रपादेन शुध्यति ।
यश्चोपनयते व्रात्यान् त्रिभिः कृच्छ्रैः स शुध्यति ॥"
भुजबलभीमकृत्यचिन्तामण्योः ।
"स्वातीशक्रधनाश्विमित्रकरभे पौष्णे्यचित्रा-
हरि-
श्विन्दौ तोयपतौ भगेऽदितिसुते भाद्रद्वये सागरे ।
केन्द्रस्थे भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्के-
ज्यकाः ॥"
अदितिसुत उत्तरफल्गुनी । सागरः पूर्व्वाषाढ़ा । दीपिकायाम् ।
"जीवार्केन्दूडुशुद्धौ हरिशयनबहिर्भास्करे
चोत्तरस्थे
स्वाध्याये वेदवर्णाधिप इह शुभदे चोरिमे
नादितौ च ।
शुक्लार्केज्यर्क्षलग्ने रविमदनतिथिं प्रोज्झ्य
षष्ठाष्टमेन्दुं
नो जीवास्तातिचारेऽर्कसितगुरुदिने काल-
शुद्धौ व्रतं स्यात् ॥"
रविमदनतिथिं सप्तमीं त्रयोदशीम् । षष्ठाष्टमेन्दुं लग्नापेक्षया । कृत्यचिन्तामणौ ।
"माघे द्रविणशीलाढ्यः फाल्गुने च दृढ़व्रतः ।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत् ।
ज्यैष्ठे गहननीतिज्ञ आषाढ़े क्रतुभाजनः ।
शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम् ॥"
राजमार्त्तण्डः ।
"पुनर्व्वसौ कृतो विप्रः पुनःसंस्कारमर्हति ॥"
आश्वलायनः । उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदानविवाहाः । विवाहः सार्व्वकालिक इत्येके । आपूर्य्यमाणे पक्षे शुक्ले पक्षे । वृद्धगार्ग्यः ।